पत्तनं, क्ली, (पतन्ति गच्छन्ति जना यस्मिन्। पत ऌ गतौ + "वीपतिभ्यां तनन्।" उणां ३।१५०। इति तनन्।) नगरम्। इत्यमरः। २।२।१०॥ (यथा, भागवते। ७। २। १४।
"पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान्।
खेटखर्व्वटघोषांश्च ददहुः पत्तनानि च॥")
महती पुरी। इति श्रीधरस्वामी॥ मृदङ्गः। इति हारावली॥

पत्तनवणिक्, [ज्] पुं, (पत्तनस्य नगरस्य वणिक्।) नगरवणिक्। तत्पर्य्यायः। स्वाध्यायी २। इति त्रिकाण्डशेषः॥

पत्तिः, पुं, (पद्यते विपक्षसेनां प्रति पद्भ्यां गच्छतीति। पद्यौ ङ गतौ + "पदिप्रथिभ्यां नित्।" उणां ४। १८२। इति तिः स च नित्।) पदातिकः। इत्यमरः। २।८।६६। (यथा, रघुः। ७।३७।
"पत्तिः पदातिं रथिनं रथेश-
स्तुरङ्गसादी तुरगाधिरूढम्।
यन्ता गजस्याभ्यपतद्गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम्॥" ॥
पद्यते विपक्षं प्राप्नोतीति। पद् + तिन्।) वीरः। इति विश्वः॥

पत्तिः, स्त्री, (पत ऌ गतौ + भावे क्तिन्।) गतिः। (पत्यते विपक्षो यया। पत् + करणे क्तिन्।) सेनाविशेषः। यदुक्तं अमरे। २।८।८०।
"एकेभैकरथा त्र्यश्वा पत्तिः पञ्च पदातिका॥"

पत्तिसंहतिः, स्त्री, (पत्तीनां पदातीनां संहतिः।) पदातिसमूहः। तत्पर्य्यायः। पादातम् २। इत्यमरः। २।८।६७॥

पत्तूरः, पुं, (पत गतौ + बाहुलकादूरः। निपातनात् तस्य द्वित्वम्।) शालिञ्चशाकः। इति त्रिकाण्डशेषः॥ पत्तङ्गे, क्ली। इति भावप्रकाशः॥

पत्नी, स्त्री (पत्यर्थत्रे सम्बन्धो यया। "पत्युर्नो यज्ञसंयोगे।" ४।१।३२। इति नकारादेशः ङीप् च।) वेदविधानेनोढ़ा। अन्यत्रोपचारात्। पत्या उद्वाहविहितमन्त्रादिना ऊढ़ा। इति भरतः॥ तत्पर्य्यायः। पाणिगृहीती २ द्वितीया ३ सहधर्म्मिणी ४ भार्य्या ५ जाया ६ दाराः ७ सधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० गृहिणी ११। इति शब्दरत्नावली॥ सहचरी १२ गृहः १३ क्षेत्रम् १४ वधूः १५ जनी १६ परिग्रहः १७ ऊढ़ा १८ कलत्रम् १९। इति हेमचन्द्रः॥ (पत्नीगुणेनैव हि पुरुषाः सुखिनो भवन्ति। यस्य पत्नी वशानुगा स भूस्थोऽपि स्वर्गस्थः। गृहाश्रमतुल्यं किञ्चिदपि नास्ति यदि तत्र हितकामा पत्नी वर्त्तते। सपत्नीक एव सर्व्वधर्म्मकरणार्हः। यदुक्तं दक्षसंहितायाम्।
"पत्नीमूलं गृहं पुंसां यदि छन्दोऽनुवर्त्तिनी।
गृहाश्रमसमं नास्ति यदि भार्य्या वशानुगा॥
तया धर्म्मार्थकामानां त्रिवर्गफलमश्नुते।
प्राकाम्ये वर्त्तमाना तु स्नेहान्नतु निवारिता॥
अवश्या सा भवेत् पश्चात् यथा व्याधिरुपेक्षितः।
अनुकूला न वाग्दुष्टा दक्षा साध्वी प्रियंवदा॥
आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी।
अनुकूलकलत्रो यस्तस्य स्वर्ग इहैव हि॥
प्रतिकूलकलत्रस्य नरको नात्र संशयः।
स्वर्गेऽपि दुर्लभं ह्येतदनुरागं परस्परम्॥
रक्त एको विरक्तोऽन्यस्तस्मात् कष्टतरं नु किम्॥
गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम्।
सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी॥
दुःखदान्या सदा खिन्ना चित्तभेदात् परस्परम्।
प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः॥
योषित् सर्व्वा जलौकेव भूषणाच्छादनाशनैः।
सुभृत्यापि कृता नित्यं पुरुषं ह्यपकर्षति॥
जलौका रक्तमादत्ते केवलं सा तपस्विनी।
इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम्॥
सशङ्का बालभावे तु यौवने विमुखी भवेत्।
तृणवन्मन्यते पश्चाद्वृद्धभावे स्वकं पतिम्॥
अनुकूला न वाग्दुष्टा दक्षा साध्वी पतिव्रता।
एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः॥
या हृष्टमनसा नित्यं स्थानमानविचक्षणा।
भर्त्तुः प्रीतिकरी नित्यं सा पत्नी हीतरा ज्वरा॥")

पत्नाटः, पुं, (अटति सुखं विहरति अत्र इति आटो गृहम्। ततः पत्न्या आटः।) पत्नीगृहम्। यदुक्तं त्रिकाण्डशेषे।
"वासागारं भोगगृहं कन्यापत्नाटनिष्कुटाः॥"

प(त्र)त्त्रं, क्ली, (पतति वृक्षात्। पत ऌ गतौ + "सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४।१५८। इति ष्ट्रन्।) वृक्षावयवविशेषः। पाता इति भाषा। तत्पर्य्यायः। पलाशम् २ छदनम् ३ दलम् ४ पर्णम् ५ छदः ६। इत्यमरः। २। ४। १४॥ पात्रम् ७ छादनम् ८ बर्हम् ९ बर्हणम् १० पत्रकम् ११। इति शब्दरत्नावली॥ ॥ विष्णवे पत्रविशेषदानफलं यथा नारसिंहे ५२ अध्याये।
"पत्राण्यपि सपुष्पाणि हरेः प्रीतिकराणि च।
प्रवक्ष्यामि नृपश्रेष्ठ! शृणुष्व गदतो मम॥
अपामार्गपत्रं प्रथमं तस्माद्भृङ्गारकं परम्।
तस्मात्तु खादिरं श्रेष्ठं ततश्च शमिपत्रकम्॥
दूर्व्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम्।
पत्रं तस्माद्दमनकं ततो विल्वस्य पत्रकम्॥
विल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम्।
एतेषाञ्च यथालब्धैः पत्रैर्वा योऽर्च्चयेद्धरिम्॥
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते॥"
देवीप्रीतिकरपत्राणि यथा,—
"अपामार्गस्य पत्रन्तु ततो भृङ्गारपत्रकम्।
ततोऽपि गन्धिनीपत्रं वलाहकमतः परम्॥
तस्मात् खदिरपत्रन्तु वञ्जुलस्तवकस्तथा।
आम्रन्तु वकगुच्छस्तु जम्बूपत्रं ततः परम्॥
बीजपूरस्य पत्रन्तु ततोऽपि कुशपत्रकम्।
दूर्व्वाङ्कुरं ततः प्रोक्तं शमीपत्रमतः परम्॥
पत्रमामलकं तस्माद्दामपत्रमतः परम्।
सर्व्वतो विल्वपत्रन्तु देव्याः प्रीतिकरं मतम्॥"
इति कालिकापुराणे ६८ अध्यायः॥ ॥
तेजपत्रम्। तत्पर्य्यायः। तमालपत्रम् १ पत्रकम् २ छदनम् ३ दलम् ४ पालाशम् ५ अंशुकम् ६ वासः ७ तापसम् ८ सुकुमारकम् ९ वस्त्रम् १० तमालकम् ११ रामम् १२ गोपनम् १३ वसनम् १४ तमालम् १५ सुरनिर्गन्धम् १६। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातविषवस्तिकण्डूतिदोषनाशित्वम्। मुखमस्तकशोधनत्वञ्च। इति राजनिर्घण्टः॥ अपि च। भावप्रकाशे।
"पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु।
निहन्ति कफवातार्शोहृल्लासारुचिपीनसान्॥"
(पत्यते स्थानात् स्थानान्तरे अनेन। पत + "दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।" ३। २। १८२। इति करणे ष्ट्रन्।) वाहनम्। शरपक्षः। पक्षिपक्षः। इति मेदिनी॥ ॥ (पत्यते पात्यते शास्त्रबोधायवर्णनिचयोऽनेन। पत् + करणे ष्ट्रन्। अन्तर्निवन्तत्वात् तथात्वम्।) लिखनाधारः। पात् इति भाषा। यथा, ज्योतिस्तत्त्वे।
"षाण्मासिके तु समये भ्रान्तिः संजायते यतः।
धात्राक्षराणि सृष्टानि पत्रारूढ़ान्यतः पुरा॥"
धातुमयपत्राकृतिद्रव्यम्। पतर् इति तवक् इति च भाषा। यथा, तुलापुरुषदाने दानसागरे।
"सुवर्णपत्राभरणा च कार्य्या
सुलोहपार्श्वद्वयशृङ्खलाभिः॥" ॥
(पात्यते स्थानात् स्थानान्तरं समाचारोऽनेन।) पत्री। लिपिः। तस्य रञ्जनं यथा,—
"सुवर्णरूप्यरङ्गाद्यै रञ्जयेत् पत्रमुत्तमम्।
सामान्योत्तममध्यानां पत्ररञ्जनमीरितम्॥" ॥
अथ पत्रप्रमाणम्।
"षडङ्गुलाधिकं हस्तं पत्रमुत्तममीरितम्।
मध्यमं हस्तमात्रं स्यात् सामान्यं मुष्टिहस्तकम्॥"
अथ पत्रभङ्गप्रकारः।
"पत्रन्तु त्रिगुणीकृत्य ऊर्द्धं तु द्विगुणं त्यजेत्।
शेषभागे लिखेद्वर्णान् गद्यपद्यादिसंयुतान्॥" ॥
अथ पत्रस्य रचनक्रमः।
"राजलेखकमाहूय नृपो ब्रूयात् प्रयत्नतः।
पत्रं कुरु यथायोग्यं गद्यपद्यादिसंयुतम्॥
पण्डितद्वयमानीय लेखको रहसि स्थितः।
यथायोग्यानुसारेण पत्रं कुर्य्यान्मनोरमम्॥
दिनद्वयं त्रयं वापि विचार्य्य पण्डितैन वै।
स्वभ्रान्तेर्द्वयणं ज्ञात्वा विलिखेत् पत्रपुस्तके॥
सामान्यपत्रे संलिख्य रहसि श्रावयेन्नृपम्।
नृपाज्ञया शुभे पत्रे विलिखेद्राजलेखकः॥" ॥
अथ लेखनप्रकारः।
"अङ्कुशं प्रथमं दद्यात् मङ्गलार्थं विचक्षणः।
मध्ये विन्दुसमायुक्तमधः सप्ताङ्कसंयुतम्॥ १॥
तदधः स्वस्ति विन्यस्य ततो गद्यं सुशोभनम्।
ततः श्रीशब्दरूपाणि पदन्यासक्रमं लिखेत्॥
भाषया संस्कृतेनैव कुशलं विलिखेत् सुधीः।
ततः शुभाशुभां वार्त्तां संस्कृतैः प्राकृतैस्तथा॥
ततः प्रमाणसन्देशं ततो वार्त्तां नियोजयेत्।
कीर्त्तिप्रीतियुतं पद्यं ततः किमधिकादिकम्॥
पत्रप्रेषणश्लोकञ्च अङ्कमासादिसंयुतम्।